विशय:, पुं, (वि+शी+अच्।) संशय:। यथा,
"विषयो विशयश्चैव पूर्व्वपक्षस्तथोत्तरम्।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम्॥"
विषयो विचारार्हवाक्यम्। विशयोऽस्यायमर्थो न वा इति संशय:। इति तिथ्यादितत्त्वम्॥ आश्रय:। इति केचित्॥

विशयी, [न्] त्रि, (विशयोऽस्यास्तीति। विशय+इनि:।) संशयी। इति विशयशब्दार्थदर्शनात्॥

विशर:, पुं, (वि+शॄ हिंसायाम्+अप्।) वध:। इत्यमर:॥

विशरणं, क्ली, (वि+शॄ+ल्युट्।) मारणम्। इति हेमचन्द्र:॥

विशल्य:, त्रि, (विगतं शल्यं यस्मात्।) शल्यरहित:। यथा,—
"सशल्य: स समाघ्राय लक्ष्मण: परवीरहा।
विशल्यो विरुज: शीघ्रमुदतिष्ठन् महीतलात्॥"
इति श्रीरामायणे युद्धकाण्डे १०२ सर्ग:॥

विशल्यकरणी, स्त्री, (विशल्यं क्रियतेऽनयेति। विशल्य+कृ+ल्युट्। ङीप्।) औषधिविशेष:। यथा,—
"पूर्व्वन्तु कथितो योऽसौ वीर जाम्बवता तव।
दक्षिणे शिखरे जातां महौषधिमिहानय॥
विशल्यकरणीं नाम्ना सावर्ण्यकरणीं तथा।
संजीवकरणीं वीर सन्धानीञ्च महौषधीम्॥"
इति रामायणे वाल्मीकीये युद्धकाण्डे १०३ सर्ग:॥

विशल्यकृत्, पुं, (विशल्यं तत्प्रहारजन्यवेदनादिनाशं करोतीति। कृ+क्विप्।) विशालीवृक्ष:। हापरमालीति ख्यात:। तत्पर्य्याय:। अघोड़क: २ सुकल्क: ३ भूपलाश: ४। इति रत्नमाला॥ आस्फोत: ५ आचरप्रिय: ६। इति शब्दचन्द्रिका। विशल्यकारिणि, त्रि॥

विशल्या, स्त्री, (विगतं शल्यन्तत्प्रहारादिजनितवेदनादिनाशो यया।) गुड़ूची। (अस्या: पर्य्यायो यथा,—
"गुड़ूची मधुपर्णी स्यादमृतामृतवल्लरी।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च॥
जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली।
चक्रलक्षणिका धीरा विशल्या च रसायनी॥
चन्द्रहासा वय:स्था च मण्डली देवनिर्म्मिता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे॥)
अग्निशिखावृक्ष:। (अस्या: पर्य्यायो यथा,—
"कलिहारी तु हलिनी लाङ्गली शक्रपुष्प्यपि।
विशल्याग्निशिखानन्ता वह्निवक्त्रा च गर्भनुत्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे॥)
दन्ती। इत्यमर:॥ (अस्या: पर्य्यायो यथा,—
गुदन्ती विशल्या च स्यादुदुम्बरपर्ण्यपि।
तथैरण्डफला शीघ्रा श्येनघण्टाघुणप्रिया॥
वाराहाङ्गी च कथिता निकुम्भश्च मकूलक:॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
त्रिपुटा। इति मेदिनी॥ कलिकारी। अजमोदा। इति राजनिर्घण्ट:॥ (नदीविशेष:। यथा, महाभारते। २। ९। २०।
"किम्पुना च विशल्या च तथा वैतरणी नदी॥")

विशसनं, क्ली, (वि+शस हिंसायाम्+ल्युट्।) मारणम्। इत्यमर:॥ (यथा, हरिवंशे। ९९। ४३।
"तस्मिन् विशसने घोरे चक्रलाङ्गलसंप्लवे।
दारुणानि प्रवृत्तानि रक्षांस्यौत्पातिकानि च॥"
नरकविशेष:। यथा, भागवते। ५। २६। ७।
"प्राणरोधो विशसनं लालाभक्ष: सारमेयादनमवीचिरय:पानमिति॥"॥ विनाशकारिणि, त्रि। यथा, महाभारते। ६। ५९। ६०।
"यमदण्डोपमां गुर्व्वीमिन्द्राशनिसमस्वनाम्।
अपश्याम महाराज रौद्रीं विशसनीं गदाम्॥")

विशसन:, पुं, (विशसति छिनत्तीति। वि+शस हिंसायाम्+ल्यु:।) खड्ग:। इति त्रिकाण्डशेष:॥ (यथा, महाभारते। १२। १६६। ८३—८४।
"असेरष्टौ हि नामानि रहस्यानि निबोध मे।
पाण्डवेय सदा यानि कीर्त्तयन् लभते जयम्॥
असिर्व्विशसन: खड्गस्तीक्ष्णधारो दुरासद:।
श्रीगर्भो विजयश्चैव धर्म्मपालस्तथैव च॥")

विशसित:, त्रि, मारित:। विपूर्व्वशसधातो: क्तप्रत्ययेन निष्पन्न:। इति सिद्धान्तकौमुदी॥

विशस्त:, त्रि, अविनीत:। "वृषिशसी वैयात्ये। एतौ निष्ठायामविनये इडानिटौ स्त:। धृष्टो विशस्त:। अन्यत्र धर्षित:। विशसित:। इति सिद्धान्तकौमुदी॥

विशस्ता, [ऋ] पुं, (वि+शस हिंसायाम्+तृच्।) चाण्डाल:। इति संक्षिप्तसारोणादिवृत्ति:॥ (हिंसाकारके, त्रि। यथा, महाभारते। १२। ११५। ४९।
"आहर्त्ता चानुमन्ता च विशस्ता क्रयविक्रयी।
संस्कर्त्ता चोपभोक्ता च खादक: सर्व्व एव ते॥"
पापिन इति शेष:॥)

विशाकर:, पुं, भद्रचूड़:। इति शब्दचन्द्रिका॥ लङ्कासिज् इति भाषा॥

विशाख:, पुं, कार्त्तिकेय:। इत्यमर:॥ (यथा, महाभारते। ३। २३१। ७:
"प्रभुर्नेता विशाखश्च नैगमेय: सुदुश्चर:॥")
धन्विनां वितस्त्यन्तरेण पादसंस्थानम्। इति भरत:॥ याचक:। इति मेदिनीकरहेमचन्द्रौ॥ पुनर्नवा। इति राजनिर्घण्ट:॥ (विगता शाखा यस्य। शाखाविहीने, त्रि। यथा, हरिवंशे। ४८। ५२।
"...वन्धोऽवस्थित: संख्ये विशाख इव पादप:॥")

विशाखज:, पुं, नारङ्ग:। इति शब्दचन्द्रिका॥ विशाखजाते, त्रि॥

विशाखलं, क्ली, युद्धकाले मध्ये विन्यस्तपादद्वयम्। यथा,—
"विशालान्तरविन्यस्ते पादयुग्मे विशाखलम्॥"
इति शब्दमाला॥

विशाखा, स्त्री, कठिल्लक:। इति मेदिनी॥ अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतषोड़शनक्षत्रम्। तत्पर्य्याय:। राधा २। इत्यमर:॥ "विशाखे द्वे।
'पत्न्योर्मध्यगतस्तत्र सुग्रीव: प्लवगेश्वर:।
विशाखयोर्मध्यगत: संपूर्ण इव चन्द्रमा:॥'
इति रामायणम्॥
अतएव द्वित्वमुचितं किन्तु एकतारापेक्षया एकवचनमिहोक्तम्।" इति भरत:॥ तस्या रूपं तोरणाकारचतुस्तारामयम्। इति मुहूर्त्तचिन्तामणि:॥
"तोरणाकृतिनि पञ्चतारके
तारकेशवदने विशाखभे।
तन्वि यान्ति विबुधाध्वमध्यगे
कुम्भतो रसभुजा: कला: प्रिये॥"
इं। ०।२६। इति कालिदासकृतरात्रिलग्ननिरूपकग्रन्थ:॥ अस्या अधिदेवते शक्राग्नी। इयं मिश्रगणान्तर्गता। इति ज्योतिस्तत्त्वम्॥ * ॥
तत्र जातफलम्।
"सदानुरक्तो विविधक्रियायां
सुवर्णकारैरपि सख्यमेति।
यस्य प्रसूतौ च भवेत् विशाखा
सखा न कस्यापि भवेत् प्रसूत:॥"
इति कोष्ठीप्रदीप:॥

विशातन:, त्रि, (वि+शत+णिच्+ल्यु:।) मोचनकर्त्ता। (यथा, महाभारते। ७। ८१। १८।
"नमस्ते देवदेवेश सनातन विशातन।
विष्णो जिष्णो हरे कृष्ण वैकुण्ठ पुरुषोत्तम॥")
यथा च।
"साधु वीर त्वया पृष्टमवतारकथां हरे:।
यत्त्वं पृच्छसि मर्त्यानां मृत्युपाशविशातनीम्॥"
इति श्रीभागवते ३ स्कन्धे १४ अध्याय:॥
"मृत्यो: पाशं विशातयति मोचयतीति तथा।"
इति तट्टीकायां श्रीधरस्वामी॥ (वि+शत+णिच्+ल्युट्। पातने, क्ली। यथा, महाभारते। ७। १२। १९।
"यतमाना: प्रयत्नेन द्रोणानीकविशातने।
न शेकु: स्वकया युद्धे तद्धि द्रोणेन पालितम्॥")

विशाय:, पुं, (वि+शी+"ग्रुपयो: शेते: पर्य्याये।" ३। ३। ३९। इति घञ्।) प्रहरिकादीनां क्रमेण शयनम्। यथा, अमरे।
"उपशायो विशायश्च पर्य्यायशयनार्थकौ॥"

विशारणं, क्ली, (वि+शॄ+णिच्+ल्युट्।) मारणम्। इति हेमचन्द्र:॥

विशारद:, त्रि, विद्वान्। (यथा, मनु:। ७। ६३।
"दूतञ्चैव प्रकुर्व्वीत सर्व्वशास्त्रविशारदम्॥")
प्रगल्भ:। इत्यमर:॥ प्रसिद्ध:। इति हारावली॥ श्रेष्ठ:। इत्यजयपाल:॥ वकुले, पुं। इति राजनिर्घण्ट:॥

विशारदा, स्त्री, क्षुद्रदुरालभा। इति राजनिर्घण्ट:॥

विशाल:, त्रि, (वि+"वे: शालच्छङ्कटचौ।" इति शालच्। यद्वा, विश प्रवेशने+"तमिविशि-